শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱ্যাসরাজযতি ৱিরচিতম্

# ॥ শ্রী শ্রীনিৱাসস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী শ্রীনিৱাসস্তোত্রম্ ॥

প্রাতঃ স্মরামি রমযা সহ ৱেঙ্কটেশং
মন্দস্মিতং মুখসরোরুহকান্তিরম্যম্।
মাণিক্যকান্তিৱিলসন্মুকুটোর্ধ্ৱপুণ্ড্রং
পদ্মাক্ষলক্ষমণিকুণ্ডলমণ্ডিতাঙ্গম্॥ **1** ॥

প্রাতর্ভজামি কররম্যসুশঙ্খচক্রং
ভক্তাভযপ্রদকটিস্থলদত্তপাণিম্।
শ্রীৱৎসকৌস্তুভলসন্মণিকাঞ্চনাড্যং
পীতাম্বরং মদনকোটিসুমোহনাঙ্গম্॥ **2** ॥

প্রাতর্নমামি পরমাত্মপদারৱিন্দম্
আনন্দসান্দ্রনিলযং মণিনূপুরাড্যম্।
এতৎ সমস্তজগতামিতি দর্শযন্তং
ৱৈকুণ্ঠমত্র ভজতাং করপল্লৱেন॥ **3** ॥

ৱ্যাসরাজযতিপ্রোক্তং শ্লোকত্রযমিদং শুভম্।
প্রাতঃ কালে পঠেদ্যস্তু পাপেভ্যো মুচ্যতে নরঃ॥ **4** ॥

॥ শ্রী শ্রীনিৱাসস্তোত্রং সমাপ্তম্॥